# Shri Mahashastri Ashtottarashatanamavalih 2

# श्रीमहाशास्तृ अष्टोत्तरशतनामावलिः २

## Document Information

Text title : mahAshAstRRiaShTottarashatanAmAvaliH 2

File name : mahAshAstRRiaShTottarashatanAmAvaliH2.itx

Category : deities_misc, aShTottarashatanAmAvalI, ayyappa

Location : doc_deities_misc

Proofread by : PSA Easwaran

Latest update : July 10, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 10, 2021

*sanskritdocuments.org*

# श्रीमहाशास्तृ अष्टोत्तरशतनामावलिः २

अस्य श्रीमहाशास्तृमहामन्त्रस्य, अर्धनारीश्वर ऋषिः,
देवी गायत्री छन्दः, श्रीमहाशास्ता देवता ।
ह्रां बीजम् । ह्रीं शक्तिः । ह्रूं कीलकम् ।
श्रीमहाशास्तृप्रसादसिद्ध्यर्थे जपे विनियोगः ॥

अथ करन्यासः -
ह्रां अङ्गुष्ठाभ्यां नमः ।
ह्रीं तर्जनीभ्यां नमः ।
ह्रूं मध्यमाभ्यां नमः ।
ह्रैं अनामिकाभ्यां नमः ।
ह्रौं कनिष्ठिकाभ्यां नमः ।
ह्रः करतलकरपृष्ठाभ्यां नमः ॥

अथ हृदयादि न्यासः -
ह्रां हृदयाय नमः ।
ह्रीं शिरसे स्वाहा ।
ह्रूं शिखायै वषट् ।
ह्रैं कवचाय हुम् ।
ह्रौं नेत्रत्रयाय वौषट् ।
ह्रः अस्त्राय फट् ।
भूर्भुवःसुवरोमिति दिग्बन्धः ॥

ध्यानम्-
कल्हारोज्ज्वलनीलकुन्तलभरं कालाम्बुदश्यामलं
कर्पूराकलिताभिरामवपुषं कुन्देन्दुबिम्बाननम् ।
श्रीदण्डाङ्कुशपाशशूलविलसत्पाणिं मदान्त-
द्विपारूढं शत्रुविमर्दनं हृदि महाशास्तारमाद्यं भजे ॥

पञ्चोपचाराः ।
मूलं - ॐ ह्रीं हरिहरपुत्राय पुत्रलभाय शत्रुनाशाय
मदगजवाहनाय महाशास्त्रे नमः ।

ॐ महाशास्त्रे नमः । महादेवाय । महादेवसुताय । अव्ययाय । लोककर्त्रे ।
लोकभर्त्रे । लोकहर्त्रे । परात्पराय । त्रिलोकरक्षकाय धन्विने ।
तपस्विने । भूतसैनिकाय । मन्त्रवेदिने । महावेदिने । मारुताय ।
जगदीश्वराय । लोकाध्यक्षाय । अग्रण्ये । श्रीमते ।
अप्रमेयपराक्रमाय नमः ॥ २०

ॐ सिंहारूढाय नमः । गजारूढाय । हयारूढाय । महेश्वराय ।
नानाशस्त्रधराय । अनर्घाय । नानाविद्याविशारदाय । नानारूपधराय ।
वीराय । नानाप्राणिनिषेवकाय । भूतेशाय । भूतिदाय । भृत्याय ।
भुजङ्गाभरणोत्तमाय । इक्षुधन्विने । पुष्पबाणाय । महारूपाय ।
महाप्रभवे । मायादेवीसुताय । मान्याय नमः ॥ ४०

ॐ महनीयाय नमः । महागुणाय । महाशैवाय । महारुद्राय ।
वैष्णवाय । विष्णुपूजकाय । विघ्नेशाय । वीरभद्रेशाय । भैरवाय ।
षण्मुखध्रुवाय । मेरुशृङ्गसमासीनाय । मुनिसङ्घनिषेविताय ।
देवाय । भद्राय । जगन्नाथाय । गणनाथाय । गणेश्वराय । महायोगिने ।
महामायिने । महाज्ञानिने नमः ॥ ६०

ॐ महास्थिराय नमः । देवशास्त्रे । भूतशास्त्रे । भीमहासपराक्रमाय ।
नागहाराय । नागकेशाय । व्योमकेशाय । सनातनाय । सुगुणाय ।
निर्गुणाय । नित्याय । नित्यतृप्ताय । निराश्रयाय । लोकाश्रयाय ।
गणाधीशाय । चतुःषष्टिकलामयाय । ऋग्यजुःसामाथर्वरूपिणे ।
मल्लकासुरभञ्जनाय । त्रिमूर्तये । दैत्यमथनाय नमः ॥ ८०

ॐ प्रकृतये नमः । पुरुषोत्तमाय । कालज्ञानिने । महाज्ञानिने ।
कामदाय । कमलेक्षणाय । कल्पवृक्षाय । महावृक्षाय ।
विद्यावृक्षाय । विभूतिदाय । संसारतापविच्छेत्रे ।
पशुलोकभयङ्कराय । रोगहन्त्रे । प्राणधात्रे । परगर्वविभञ्जनाय ।
सर्वशास्त्रार्थतत्त्वज्ञाय । नीतिमते । पापभञ्जनाय । पुष्कलापूर्णा-
संयुक्ताय । परमात्मने नमः ॥ १००

ॐ सतां गतये नमः । अनन्तादित्यसङ्काशाय । सुब्रह्मण्यानुजाय ।

बलिने । भक्तानुकम्पिने । देवेशाय । भगवते । भक्तवत्सलाय नमः ॥ १०८

ॐ श्रीपूर्णापुष्कलाम्बासमेत श्रीहरिहरपुत्रस्वामिने नमः ।

इति श्रीमहाशास्तृ अष्टोत्तरशतनामावलिः समाप्ता ।

Proofread by PSA Easwaran

*Shri Mahashastri Ashtottarashatanamavalih 2*

pdf was typeset on July 10, 2021

Please send corrections to *sanskrit@cheerful.com*